
# SAMPLE PAPER
## Common Annual School Examination-2019

Class-VII (PRATIBHA) Subject- Sanskrit

Time- 2.30 Hrs. M.M.- 50

| Q. No | Description | M.M |
|---|---|---|
| | सामान्य-निर्देशाः<br>1. प्रश्नपत्रे चत्वारः खण्डाः सन्ति।<br>खण्ड- 'क' अपठित-अवबोधनम् 10 अङ्काः<br>खण्ड- 'ख' रचनात्मक-कार्यम् 08 अङ्काः<br>खण्ड- 'ग' अनुप्रयुक्त-व्याकरणम् 12 अङ्काः<br>खण्ड- 'घ' पठित-अवबोधनम् 20 अङ्काः<br>2. सर्वे प्रश्नाः अनिवार्याः सन्ति।<br>3. उत्तराणि संस्कृतेन एव लेखनीयानि।<br>4. प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।<br>5. प्रश्न-संख्या अवश्यमेव लेखनीया।<br>खण्डः- 'क'<br>अपठित-अवबोधनम् (8 अङ्काः) | |
| 1- | **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत-**<br>अस्माकं मातृभूमिः भारतवर्षम् अस्ति। अस्य उत्तरस्यां दिशि पर्वतानां राजा हिमालयः वर्तते। भारतस्य संस्कृतिः अतीव प्राचीना वर्तते। अस्मिन् देशे पाणिनी-कालिदास-चाणक्य-सुश्रुत-आर्यभट्ट-प्रभृतयः विद्वांसः अभवन्। एते विद्वांसः बहुविधग्रन्थान् रचितवन्तः। गंगा-यमुना-सरयू-ब्रह्मपुत्रादयः नद्यः भारतभूमिम् उर्वरां कुर्वन्ति। अस्माकं देशस्य गौरवं गुरूगोविन्दसिंह-महाराणाप्रताप-शिवाजी-कुँवरसिंह-लक्ष्मीबाई-सुभाषचन्द्रबोस-प्रभृतयः देशभक्तवीराः सन्ति। पुरा अयं देशः पराधीनः आसीत्। किन्तु इदानीं स्वतत्रः सञ्जातः। यदि वयं देशभक्तिभावनया कार्यं कुर्मः चेत् अचिरं पुरातनगौरवं प्राप्यस्यामः।<br>I.एकपदेन उत्तरत-<br>i. हिमालयः केषां राजा वर्तते ? | <br><br><br><br><br><br><br><br><br><br><br><br>1 x2=2 |

| | | |
|---|---|---|
| | ii. भारतवर्षे विद्वांसः किं रचितवन्तः? | 2 x2=4 |
| | II. पूर्णवाक्येन उत्तरत-<br>i. भारतवर्षे के विद्वांसः अभवन् ?<br>ii. यदि वयं देशभक्तिभावनया कार्यं कुर्मः चेत् किं भविष्यति ? | 1 x4=4 |
| | III. यथानिर्देशम् उत्तरत-<br>i. <u>नूतना</u> **इति** पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?<br>(क) आदि (ख) प्राचीना (ग) पुरा (घ) पुरातना<br>ii. **'अस्य उत्तरस्यां दिशि पर्वतानां राजा हिमालयः वर्तते'** अस्मिन् वाक्ये क्रियापदं किम् ?<br>(क) अस्य (ख) दिशि (ग) राजा (घ) वर्तते<br>iii. **'देशभक्तिभावनया'** अत्र रेखांकितपदे का विभक्तिः वर्तते ?<br>(क) पञ्चमी (ख) षष्ठी (ग) प्रथमा (घ) तृतीया<br>iv. <u>**शीघ्रं**</u> इत्यस्य गद्यांशे समानार्थकं पदं किम् प्रयुक्तम् ?<br>(क) चेत् (ख) अचिरम् (ग) पुरा (घ) एतेषु किमपि न | |
| | **खण्ड- 'ख' रचनात्मक-कार्यम् (8 अङ्काः)** | |
| 2- | **चित्रं दृष्ट्वा मंजूषातः पदानि चित्वा चत्वारि वाक्यानि लिखत-**<br><br>मंजूषा-<br>विद्यालयः, क्रीडाक्षेत्रं, बालकाः, बालिकाः, बहवः, प्रकोष्ठाः, क्रीडन्ति, उद्यानम्, वृक्षाः, अस्ति, धावति, आरोहन्ति, कन्दुकेन, क्षिपति | 1 x4=4 |
| | अथवा (**केवलं नेत्रहीनछात्राणां कृते**)<br>**' मम विद्यालयः '** इति विषयम् अधिकृत्य चत्वारि वाक्यानि लिखत- | 1x4=4 |

3– **मंजूषायां प्रदत्तानां उचितकर्तृ- कर्म-क्रियापदानि मेलयित्वा वाक्यनिर्माणं कुरूत -**

| कर्ता | कर्म | क्रिया |
|---|---|---|
| यूयम् | क्रिकेटम् | पचतः |
| महिले | भोजनं | गच्छथ |
| युवाम् | विद्यालयं | क्रीडन्ति |
| बालिकाः | कार्यं | कुरुथः |

खण्डः– 'ग'(अनुप्रयुक्त–व्याकरणम्)

4– **उचितविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत–** 1 x4=4

i.छात्राः ............. क्रीडन्ति। (क्रीडाक्षेत्रे / क्रीडाक्षेत्रस्य)

ii. मोहनः .......... लिखति । (कलमात् / कलमेन)

iii. बालिका .............. सह गच्छति। (जनकस्य / जनकात्)

iv. ............ पिता शिक्षकः अस्ति। (अस्मद् / मम)

5– **मंजूषातः उचितक्रियापदानि चित्वा रिक्तस्थानानि पूरयत-** 1 x4=4

| भविष्यति , रोचते , लिखामि , सन्ति , |
|---|

i. मम हस्ते अंगुल्यः .......... ।

ii. अहम् कलमेन वाक्यं .............।

iii. अस्माकं विद्यालये श्वः परीक्षा............।

iv. बालकेभ्यः कार्टून–चित्रं ...............।

6. **कोष्ठकप्रदत्तशब्देषु लिङ्गवचनानुसारम् उचितविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-** 1 x4=4

i.सीता ............ पत्नी अस्ति। (राम–षष्ठी एकवचन)

ii. लवः .............पुत्रः अस्ति। (सीता– षष्ठी एकवचन)

| | | |
|---|---|---|
| | iii. छात्राः प्रतिदिनं .......... गच्छन्ति। (विद्यालय-द्वितीया बहुवचन) | |
| | iv. अहम् .............यात्रां करोमि।(बसयान-तृतीया एकवचन) | |
| | खण्डः- ' घ '(पठित-अवबोधनम्) | |
| 7. | **अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत-** | |
| | पुरा एकस्मिन् वृक्षे एका चटका प्रतिवसति स्म। कालेन तस्याः सन्ततिः जाता। एकदा कश्चित् प्रमत्तः गजः तस्य वृक्षस्य अधः आगत्य तस्य शाखां शुण्डेन अत्रोटयत्। चटकायाः नीडं भुवि अपतत्। तेन अण्डानि विशीर्णानि। अथ सा चटका व्यलपत्। तस्याः विलापं श्रुत्वा काष्ठकूटः नाम खगः दुःखेन ताम् अपृच्छत्-'भद्रे, किमर्थं विलपसि?' इति। | |
| | I. एकपदेन उत्तरत- | 1 x2=2 |
| | i. वृक्षे का प्रतिवसति स्म ? | |
| | ii. वृक्षस्य शाखां कः अत्रोटयत? | |
| | II. पूर्णवाक्येन उत्तरत- | 2x1=2 |
| | चटकायाः विलापं श्रुत्वा काष्ठकूटः नाम खगः किम् अपृच्छत्? | |
| | III. यथानिर्देशम् उत्तरत- | 1 x2=2 |
| | i. गजः अत्र का विभक्तिः ? | |
| | (क) द्वितीया (ख) प्रथमा (ग) तृतीया (घ) किमपि नास्ति | |
| | ii. अथ सा चटका व्यलपत् अस्मिन् वाक्ये अव्ययपदं किम् ? | |
| | (क) अथ (ख) सा (ग) चटका (घ) व्यलपत् | |
| 8. | **अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत-** | |
| | विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्<br>विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरूः।<br>विद्या बन्धुजनो विदेशगमने विद्या परा देवता<br>विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः॥ | |
| | I. एकपदेन उत्तरत- | 1 x2=2 |
| | i. नरस्य अधिकं रूपम् किम् ? | |
| | ii. भोगकरी का वर्तते ? | |
| | II. पूर्णवाक्येन उत्तरत- | 2 x1=2 |
| | i. कः पशुः कथितः? | |

| | | |
|---|---|---|
| | III. यथानिर्देशम् उत्तरत–<br>i. <u>मित्रम्</u> इति पदस्य समानार्थकपदं पद्यांशे किम्?<br>(क) राजा (ख) बन्धुः (ग) धनं (घ) विद्या<br>ii. <u>सुखकरी विद्या</u> अत्र विशेषणपदं किम्?<br>(क) सुखकरी (ख) विद्या (ग) द्वयम् (घ) किमपि नास्ति | 1 x2=2 |
| 9. | **अधोलिखितानां शब्दानां कृते मंजूषातः चित्वा संस्कृतपदम् लिखत–**<br>[ पशुः , बन्धुः, विदेशः , नृप ]<br>i. सखा –<br>ii. राजा –<br>iii. जानवर–<br>iv. परदेश– | 1x4=4 |
| 10– | **अधोलिखितं श्लोकांशं मेलयत –**<br>i.उदिते सूर्ये – उच्चैर्ढक्का<br>ii. पक्षी कूजति – धरणी विहसति<br>iii. नदति मन्दिरे – सेलति नौका<br>iv. सरितः सलिले – कमलं विकसति | 1x4=4 |